# Narayanaproktam Gomatisagarasangamatirthamahatmyavarnanam

# નારાયણપ્રોક્તં ગોમતીસાગરસઙ્ગમતીર્થમાહાત્મ્યવર્ણનમ્

## Document Information

Text title : Narayanaproktam Gomatisagarasangamatirthamahatmyavarnanam

File name : nArAyaNaproktaMgomatIsAgarasangamatIrthamAhAtmyavarNanam.itx

Category : devii, devI, nadI, lakShmInArAyaNIyasaMhitA, mAhAtmya, tIrthakShetra

Location : doc_devii

Proofread by : PSA Easwaran

Description/comments : lakShmInArAyaNIyasaMhitA | khaNDa 1 | adhyAya 221/1-50||

Latest update : January 13, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 13, 2026

*sanskritdocuments.org*

# નારાયણપ્રોક્તં ગોમતીસાગરસઙ્ગમતીર્થમાહાત્મ્યવર્ણનમ્

શ્રીનારાયણ ઉવાચ ।
તતો ગચ્છેન્મહાલક્ષ્મિ! ગોમત્યુદધિસઙ્ગમે ।
મુક્તિદ્વારં તુ તત્પ્રોક્તં કલિકાલે ન સંશયઃ ॥ ૧॥

ગઙ્ગાસાગરસંયોગે સિન્ધુસાગરસઙ્ગમે ।
ફલં યત્તલ્લભ્યતેઽત્ર ગોમત્યુદધિસઙ્ગમે ॥ ૨॥

પાપં પ્રણશ્યતે સ્નાત્વા હ્યર્ઘ્યં દદ્યાદ્વિધાનતઃ ।
કુશાંશ્ચ કરયોર્ધૃત્વા નારિકેલફલં તથા ॥ ૩॥

અર્ઘં દદ્યાન્નમસ્કૃત્ય શ્રીકૃષ્ણપરમાત્મને ।
તીર્થરાજ નમસ્તુભ્યં ત્રાહિ સંસારસાગરાત્ ॥ ૪॥

રત્નાકર ગૃહાણાઽર્ઘં ગોમત્યા સહ તે નમઃ ।
અર્ઘં દત્વા શિખાં બધ્વા સ્મૃત્વા ચ જલશાયિનમ્ ॥ ૫॥

કુર્યાત્ સ્નાનં પ્રાઙ્મુખશ્ચ પિતૄન્ સન્તર્પયેત્તતઃ ।
પિતૃશ્રાદ્ધં તથા કૃત્વા દદ્યાચ્ચ દક્ષિણાં શુભામ્ ॥ ૬॥

સુવર્ણં વાસસી દદ્યાત્ કઞ્ચુકોષ્ણીષમિત્યપિ ।
મહાદાનાનિ દદ્યાચ્ચ યદીચ્છેત્ ક્ષેમમાત્મનઃ ॥ ૭॥

લક્ષ્મ્યાઃ સહ હરિઃ સાક્ષાદ્વિષ્ણુર્મે પ્રીયતામિતિ ।
ઉક્ત્વા દદ્યાદ્વિવિધાનિ દાનાનિ ભોજનાનિ ચ ॥ ૮॥

તુલાપુરુષદાનં ચ કુર્યાત્સાગરસઙ્ગમે ।
સપ્ત દ્વીપનૃપો ભૂત્વા વૈકુણ્ઠં યાતિ માનવઃ ॥ ૯॥

તુલયા તોલયેત્ સ્વં યઃ સુવર્ણરજતાદિભિઃ ।
વસ્ત્રકુઙ્કુમકર્પૂરશર્કરાફલસદ્રસૈઃ ॥ ૧૦॥

સોઽત્ર ભોગાન્ સુખાન્ ભુક્ત્વા મોક્ષં યાતિ સુરાર્ચિતઃ ।

સ્વર્ણદાનં વાજપેયં સ્નાનં ગોમતિવારિણિ ॥ ૧૧॥

કન્યાદાનં ભૂમિદાનં વિદ્યાદાનં વિધાનતઃ ।
ગોમત્યાઃ સઙ્ગમે કુર્યાત્ યાતિ બ્રહ્મપદં હિ સઃ ॥ ૧૨॥

સ્વર્ણધેનું ઘૃતધેનું તિલધેનું પ્રદાય વૈ ।
વસ્ત્રાદિશર્કરાધેનું દત્વા યાતિ પરં પદમ્ ॥ ૧૩॥

યુગાદિતિથિમુખ્યાસુ પઞ્ચકાસ્વષ્ટકાસુ ચ ।
વૈધૃતૌ ચ વ્યતીપાતે ગજચ્છાયાહ્વયે તથા ॥ ૧૪॥

ષષ્ઠ્યમૈકાદશ્યષ્ટમીદ્વાદશીશ્રાદ્ધસદ્વ્રતે ।
સ્નાત્વા નીરનિધૌ તદ્વદ્ગોમતીચક્રતીર્થયોઃ ॥ ૧૫॥

ગોમત્યુદધિસંયોગે સ્નાત્વા બ્રહ્મપદં લભેત્ ।
અમાવાસ્યાદિને શ્રાદ્ધં કાર્યં ગોમતિસઙ્ગમે ॥ ૧૬॥

પક્ષશ્રાદ્ધકૃતં પુણ્યં દિનૈકેન લભેજ્જનઃ ।
શ્રદ્ધાહીનં મન્ત્રહીનં પાત્રહીનમથાપિ વા ॥ ૧૭॥

દ્રવ્યહીનં કાલહીનં મન ઐકાગ્ર્યવર્જિતમ્ ।
પરિપૂર્ણમમાશ્રાદ્ધં પિતૃણામુદધૌ ભવેત્ ॥ ૧૮॥

ગોમતી કમલા ચન્દ્રભાગા તદોદધૌ વસેત્ ।
ગયાયાં પિણ્ડદાનેન પ્રયાગે ચાસ્થિપાતનાત્ ॥ ૧૯॥

અમાયાં શ્રાદ્ધદાનેન શાશ્વતં પુણ્યમાપ્યતે ।
યદીચ્છેત્ સર્વતીર્થેષુ સ્નાનં વ્રતધરઃ પુમાન્ ॥ ૨૦॥

સ્નાનં કુર્વીત ભક્ત્યા વૈ ગોમત્યુદધિસઙ્ગમે ।
અપુત્રા મૃતપુત્રા વા કાકવન્ધ્યા સ્રવત્સુતા ॥ ૨૧॥

દોષૈઃ પ્રમુચ્યતે નારી ગોમત્યુદધિસઙ્ગમે ।
શ્રાદ્ધં દાનં તથા પિતૃતર્પણં જલદર્શનમ્ ॥ ૨૨॥

વ્રતં સ્નાનં તથા પુણ્યં જપો હોમશ્ચ કીર્તનમ્ ।
શાશ્વતીતૃપ્તિકૃત્પુણ્યં ગોમત્યુદધિસઙ્ગમે ॥ ૨૩॥

માતૃપક્ષાઃ પિતૃપક્ષા ભગિનીપક્ષકાસ્તથા ।
પુત્રીપક્ષાઃ શ્વશ્રૂપક્ષાસ્તથા શ્વશુરપક્ષકાઃ ॥ ૨૪॥

પિતૃસ્વસૃપક્ષગાશ્ચ સ્નુષાપક્ષાસ્તથા જનાઃ ।
સપત્નીપક્ષગાશ્ચાપિ રક્ષિકાપક્ષગા અપિ ॥ ૨૫॥

ભ્રાતૃજાયાપક્ષગાશ્ચ સ્વસૃપુત્ર્યાદિપક્ષગાઃ ।
પિતૃભ્રાતૃસુતાપત્નીપ્રભતિપક્ષકા અપિ ॥ ૨૬॥

મિત્રબાન્ધવભૃત્યાનાં યેઽપિ સમ્બન્ધધારકાઃ ।
જન્માન્તરગતા યે ચ નારકાઃ ખનિગર્ભગાઃ ॥ ૨૭॥

તે સર્વે સંસ્મૃતાઃ શ્રાદ્ધે ગોમત્યુદધિસઙ્ગમે ।
સ્નાને દાને સંસ્મૃતાશ્ચ તૃપ્તિં યાન્તિ તુ શાશ્વતીમ્ ॥ ૨૮॥

સર્વપાપૈઃ પ્રમુચ્યન્તે મુક્તિં યાન્તિ ન સંશયઃ ।
શ્રાવણદ્વાદશીયોગે સમભ્યર્ચ્ય તુ વામનમ્ ॥ ૨૯॥

પરમં લોકમાપ્નોતિ સ્નાત્વા ગોમતિસઙ્ગમે ।
પીતામ્બરધરો ભૂત્વા દિવ્યાભરગભૂષિતઃ ॥ ૩૦॥

ચતુર્ભુજધરશ્ચૈવ વનમાલાવિભૂષિતઃ ।
સેવ્યમાનઃ સુરસ્ત્રીભિર્વિમાનકૃતવાહનઃ ॥ ૩૧॥

સંસ્તૂયમાનઃ ઋષિભિઃ શ્રીહરેરર્ચકો જનઃ ।
ગોમતીસઙ્ગમે પૂતો યાતિ વિષ્ણોઃ પરં પદમ્ ॥ ૩૨॥

ગોમતીસાગરે સ્નાત્વા ગચ્છેત્ સપ્તપ્રકુણ્ડકાન્ ।
સર્વૈરારાધિતઃ કૃષ્ણો હરિરાવિર્બભૂવ હ ॥ ૩૩॥

સહ લક્ષ્મ્યા હરિં દૃષ્ટ્વા સનકાદ્યા મહર્ષયઃ ।
સપ્તમિષ્ટજલગર્તાન્ કૃત્વા સિષિચુરિન્દિરામ્ ॥ ૩૪॥

તતો લક્ષ્મીહ્રદા એતે કલૌ તે રુક્મિણીહ્રદાઃ ।
ભૃગુણા સેવિતાશ્ચૈતે ભગુતીર્થમિતિ સ્મૃતમ્ ॥ ૩૫॥

તત્ર પ્રક્ષાલ્ય ચરણૌ તથાઽઽચમ્ય કુશાઁસ્તતઃ ।
સઙ્ગૃહ્ય પ્રાઙ્મુખો ભૂત્વાઽર્ઘં ગૃહ્ણીત્વાઽક્ષતાદિભિઃ ॥ ૩૬॥

હસ્તૌ ચ મસ્તકોપરિ સમુન્નીય ફલાદિભિઃ ।
અર્ઘં દાતવ્યમેવાત્ર હ્રદે રુક્મિણિસંજ્ઞિતે ॥ ૩૭॥

સ્નાનં કુર્યાત્તતો ધ્યાત્વા તીર્થાનિ પિતૃદેવતાઃ ।
દેવમાનવપિતૄઁશ્ચ સન્તર્પ્ય હરિભાવતઃ ॥ ૩૮॥

વિપ્રાનાહૂય ચ શ્રાદ્ધં પ્રકુર્વીત ચ ભક્તિતઃ ।
દક્ષિણાં રજતં સ્વર્ણં ફલં મિષ્ટાન્નમમ્બરમ્ ॥ ૩૯॥

ભોજનં ચાપિ દમ્પત્યોર્દદ્યાચ્ચ ભૂષણાદિકમ્ ।
શાટીં ચ કઞ્ચુકીં શ્રેષ્ઠાં ઘર્ઘરીં કર્પટાદિકમ્ ॥ ૪૦॥

પિતૃપઙ્ક્તીશ્ચ સમ્પૂજ્ય નારીશ્ચાન્યાઃ કુમારિકાઃ ।
સમ્પૂજ્ય દદ્યાદ્ દાનાનિ રુક્મિણી પ્રીયતામિતિ ॥ ૪૧॥

વસતે ચ સદા લક્ષ્મીસ્તસ્ય ગેહે ન સંશયઃ ।
સ્મૃદ્ધિં સર્વાં સમાપ્નોતિ લક્ષ્મીસ્તસ્ય પ્રસીદતિ ॥ ૪૨॥

સપ્તસ્વપિ હ્રદેષ્વેવ દાનં દદ્યાત્ પૃથક્ પૃથક્ ।
તત્સર્વં ચાઽક્ષયં વિન્દેલ્લક્ષ્મીલોકે સુખપ્રદમ્ ॥ ૪૩॥

અલક્ષ્મીર્નશ્યતિ તસ્ય લક્ષ્મીર્યસ્ય પ્રસીદતિ ।
પશુપુત્રગૃહવાટીક્ષેત્રભવનશાલયઃ ॥ ૪૪॥

ભવન્તિ સતતં શ્રેષ્ઠા લક્ષ્મીર્યસ્ય પ્રસીદતિ ।
સ્વર્ણાદિવર્ધનં તસ્ય લક્ષ્મીસ્તુષ્ટા તુ યં પ્રતિ ॥ ૪૫॥

સર્વાન્કામાનવાપ્નોતિ વિષ્ણુલોકં ચ ગચ્છતિ ।
સપ્તહ્રદેષુ લક્ષ્મ્યાત્મનારીણાં ભોજનં વરમ્ ॥ ૪૬॥

દાનં ચ પૂજનં ચૈવ સમ્માનં ભૂષણાદિકમ્ ।
શ‍ૃઙ્ગારં વાહનં યાનં દેહોપકરણાદિકમ્ ॥ ૪૭॥

પૃથક્ પૃથક્ પ્રદદ્યાદ્વૈ લક્ષ્મીર્મે પ્રીયતામિતિ ।
વસત્યેવ સદા ગેહે લક્ષ્મીસ્તસ્ય ન સંશયઃ ॥ ૪૮॥

હીનભાગ્યો ન ચ ભવેન્ન ભવેત્પરયાચકઃ ।
અગ્ર્યો ભવતિ સર્વેષુ યઃ સ્નાતિ રુક્મિણીહ્રદે ॥ ૪૯॥

પુનરાગમનં ન સ્યાદ્ વૈકુણ્ઠં યાતિ માનવઃ ।
સપત્નીકશ્ચતુર્ભુજઃ શાશ્વતં સુખમશ્નુતે ॥ ૫૦॥

ઇતિ શ્રીલક્ષ્મીનારાયણીયસંહિતાયાં પ્રથમે કૃતયુગસન્તાનેગોમતી-
સાગરસઙ્ગમતીર્થલક્ષ્મીસપ્તહ્રદતીર્થવિધાન-
નિરૂપણનામૈકવિંશાધિકદ્વિશતતમોઽધ્યાયઃ ॥ ૨૨૧॥

ઇતિ શ્રીલક્ષ્મીનારાયણીયસંહિતાયાં પ્રથમે કૃતયુગસન્તાને ૨૨૧-અધ્યાયાન્તર્ગતં
નારાયણપ્રોક્તં ગોમતીસાગરસઙ્ગમતીર્થમાહાત્મ્યવર્ણનં સમ્પૂર્ણમ્ ।

લક્ષ્મીનારાયણીયસંહિતા । ખણ્ડ ૧। અધ્યાય ૨૨૧/૧-૫૦ ॥

lakShmInArAyaNIyasaMhitA . khaNDa 1. adhyAya 221/1-50..

Proofread by PSA Easwaran

*Narayanaproktam Gomatisagarasangamatirthamahatmyavarnanam*
pdf was typeset on January 13, 2026

Please send corrections to *sanskrit@cheerful.com*